तर्षितः २ सतृट् ३ । इति त्रिकाण्डशेषः ॥
( यथा, देवीभागवते । २ । ८ । २० ।
"तृषितश्च परिश्रान्तः क्षुधितश्चोत्तरासुतः ॥"
भावे क्तः ।) तृष्णायाम्, क्ली ॥

तृषितोत्तरा, स्त्री, ( तृषितः उत्तरो यस्याः । ) अग्रानपर्णी । इति शब्दचन्द्रिका ॥

तृष्णक्, [ ज् ] त्रि, ( तृष्यति आकाङ्क्षतीति । तृष् + "स्वपितृषोर्नजिङ् ।" ३ । २ । १७२ । इति नजिङ् । ) लुब्धः । इत्यमरः । ३ । १ । २२ ॥ ( तृषितः । यथा, ऋग्वेदे । १ । ८५ । ११ । "अवसिञ्चनुत्सं गोतमाय तृष्णजे ॥")

तृष्णा, स्त्री, ( तृष + "तृषिशुषिरसिभ्यः कित् ।" उणां ३ । १२ । इति नः स च कित् । ) अप्राप्तीयस्वीकारेच्छा । इति चक्रीटीकायां नागोजी-भट्टः ॥ सा लिप्सा । ( यथा, रघुः । ८।२ ।
"तदुपस्थितमग्रहीदजः
पितुराज्ञेति न भोगतृष्णया ॥")
पानेच्छा । इति मेदिनी । णे, १६ ॥ तत्-पर्य्यायः । उदन्या २ पिपासा ३ तृट् ४ तर्षः ५ इत्यमरः । ३।३।५१ ॥ तृषा ६ । इति शब्द-रत्नावली ॥ तर्षणम् ७ । इति जटाधरः ॥*॥ रोगविशेषः । तन्निदानं यथा,—
"वातात् पित्तात् कफात् तृष्णा सन्निपातात्
द्रवक्षयात् ।
षष्ठी स्यादुपसर्गाच्च वातपित्ते तु कारणम् ॥
सर्व्वासु तत् प्रकोपो हि सौम्यधातुप्रशोषणात् ।
सर्व्वदेहे श्रमात् कम्पतापतृड्दाहमोहकृत् ॥
जिह्वामूलगलक्लोमतालुतोयवहाः शिराः ।
संशोष्य तृष्णा जायन्ते तासां सामान्यलक्ष-
णम् ॥ * ॥
मुखशोषो जलातृप्तिरन्नद्वेषः स्वरक्षयः ।
कण्ठौष्ठजिह्वाकार्कश्यं जिह्वानिष्क्रमणं क्लमः ॥
प्रलापश्चित्तविभ्रंशो स्तृड्ग्रहोक्तास्तथामयाः ।
मरुतः क्षामता दैन्यं शङ्खतोदः शिरोभ्रमः ॥
गन्धाज्ञानास्यवैरस्यश्रुतिनिद्राबलक्षयाः ।
शीताम्बुपानतृद्धिश्च पित्तान्मूर्च्छास्यतिक्तता ॥
रक्तेक्षणत्वं सततं शोषो दाहोऽतिधूमकः ।
कफं रुणद्धि कुपितस्तोयवाहिषु मारुतः ॥
स्रोतःसु स कफस्तेन पङ्कवच्छोष्यते ततः ।
शूकैरिवाचितः कण्ठो निद्रामधुरवक्त्रता ॥
आध्मानः शिरसो जाड्यं स्तैमित्यच्छर्द्दरोचकाः ।
आलस्यमविपाकश्च यः स स्यात् सर्व्वलक्षणः ॥
आमोद्भवा च भक्तस्य संरोधाद्वातपित्तजा ।
उष्णक्लान्तस्य सहसा शीताम्भो भजतस्तृषा ॥
तृष्णा वोर्द्धं गतं कोष्ठं कुर्य्यात् पित्तकृतैव सा ।
या च पानातिपानोत्था तीक्ष्णाग्नेः स्नेह-
पाकजा ॥
स्निग्धकट्वम्ललवणभोजनेन कफोद्भवा ।
तृष्णारसक्षयोक्तेन लक्षणेन क्षयात्मिका ॥
शोषमोहज्वराद्यस्य दीर्घरोगोपसर्गतः ।
या तृष्णा जायते तीव्रा सोपसर्गात्मिका स्मृता ॥"
इति गारुडे तृष्णानिदानम् १५६ अध्यायः ॥*॥
तदौषधं यथा,—
"त्रिफलापिप्पलीचूर्णं भक्षितं मधुना युतम् ।
भोजनादौ हि समधु पिपासां त्वरितं हरेत् ॥"
इति तत्रैव १६४ अध्यायः ॥ * ॥
अपि च । "अथ तृष्णाधिकारः । तत्र तृष्णाया निदानपूर्व्विकां सम्प्राप्तिमाह ।
भयश्रमाभ्यां बलसङ्क्षयाद्वा
ऊर्द्धं चितं पित्तविवर्द्धनैश्च ।
पित्तं सवातं कुपितं नराणां
तालुप्रपन्नं जनयेत् पिपासाम् ॥
स्रोतःस्वपां वाहिषु दूषितेषु
दोषैश्च तृट् सम्भवतीह जन्तोः ।
तिस्रः स्मृतास्ताः क्षतजा चतुर्थी
क्षयात्तथान्यामसमुद्भवा च ॥
भुक्तोद्भवा सप्तमिकेति तासां
निबोध लिङ्गान्यनुपूर्व्वशस्तु ॥
नराणां चितं स्वस्थान एव सञ्चितं पित्तं सवातं पित्तविवर्द्धनैः कट्वम्लोष्णादिभिः कुपितम् । भयश्रमाभ्यां बलसङ्क्षयादुपवासादेश्च वातः कुपितः । तद्द्वयं ऊर्द्धं प्रसरन् तालु-प्रपन्नं सत् पिपासां जनयेत् । न केवलं तालु-न्येव दूषिते तृषा भवति । किन्तु जलवाहि-स्रोतःस्वपि । अत आह । स्रोतःस्वित्यादि । तत्र च बहुवचनं युक्तम् । यतो जलवहे द्वे स्रोतसी सुश्रुतेनोक्ते । उच्यते । तयोरेवानेक-प्रतानयोगान्न दोषः । अपां वाहिषु स्रोतः-स्विति जिह्वादेरप्युपलक्षणम् । यत आह चरकः रसवाहिनीश्च धमनीर्जिह्वा हृदयगलतालुक्लोम च । संशोष्य नृणां देहे कुरुतस्तृष्णामतिबलौ पित्तानिलाविति ॥ सङ्ख्यामाह । तिस्र इत्यादि ॥ तृष्णायाः सामान्यं लक्षणमाह ।
सततं यः पिबेत्तोयं न तृप्तिमधिगच्छति ।
मुहुः काङ्क्षति तोयञ्च तं तृष्णार्द्दितमादिशेत् ॥
वातजाया लक्षणमाह ।
क्षामास्यता मारुतसम्भवायां
तोदस्तथा शङ्खशिरःसु चापि ।
स्रोतोनिरोधो विरसञ्च वक्त्रं
शीताभिरद्भिश्च विवृद्धमेति ॥
शङ्खशिरःसु शङ्खयोः शिरसि च । स्रोतोनिरोधो रसाम्बुवाहिधमनीनिरोधः ॥*॥ पित्तजामाह ।
मूर्च्छान्नविद्वेषविलापदाहा
रक्तेक्षणत्वं प्रततश्च शोषः ।
शीताभिनन्दा मुखतिक्तता च
पित्तात्मिकायां परिधूपनञ्च ॥
विलापः प्रलापः । प्रततश्च शोषः अविरतश्च शोषः । शीताभिनन्दा शीतेच्छा । परिधूपनं कण्ठाद्धूमनिर्गम इव ॥
कफजामाह ।
बाष्पावरोधात् कफसंवृतेऽग्नौ
तृष्णा बलासेन भवेन्नरस्य ।
निद्रागुरुत्वं मधुरास्यता च
तयार्द्दितः शुष्यति चातिमात्रम् ॥
अग्नौ जठराग्नौ । कफसंवृते स्वकारणकुपितेन कफेनोपरिष्टादाच्छादिते । बाष्पावरोधात् अग्ने-रूष्मावरोधात् । अवरुद्धानलोऽष्माम्बुवहस्रोतः-शोषणात् बलासेन कफेन नरस्य तृष्णा भवेत् । तया तृष्णया अर्द्दितः पीड़ितः । शुष्यति कृशो भवति ॥ * ॥
क्षतजामाह ।
क्षतस्य रुक्शोणितनिर्गमाभ्यां
तृष्णा चतुर्थी क्षतजा मता तु ।
क्षतस्य शस्त्रादिक्षतयुक्तस्य । रुक् पीड़ा ॥ * ॥
क्षयजामाह ।
रसक्षयाद्या क्षयसम्भवा सा
तयाभिभूतस्तु निशादिनेषु ।
पेपीयतेऽम्भः स सुखं न याति
तां सन्निपातादिति केचिदाहुः ॥
रसक्षयोक्तानि च लक्षणानि
तस्यामशेषेण भिषग्व्यवस्येत् ।
रसक्षयलक्षणानि सुश्रुतेनोक्तानि ॥ रसक्षये हृत्पीड़ा कम्पः शोषः शून्यता तृष्णा चेति । व्यवस्येत् जानीयात् ॥ * ॥
आमजामाह ।
त्रिदोषलिङ्गामसमुद्भवा च
हृच्छूलनिष्ठीवनसादकर्त्री ॥ * ॥
भुक्तोद्भवामाह ।
स्निग्धं तथाम्लं लवणञ्च भुक्तं
गुर्व्वन्नमेवाशु तृषां करोति ।
लवणञ्चेति चकारात् कटु च ॥ * ॥
उपसर्गजामाह ।
दीनस्वरः प्रताम्यन् दीनाननहृदयशुष्कगलतालुः ।
भवति खलु सोपसर्गात् तृष्णा सा शोषिणी कष्टा ॥
शोषिणी धातुशोषिणी ॥ * ॥
उपसर्गानाह ।
ज्वरो मोहः क्षयः श्वासो वाधिर्य्यं कास एव च ।
बहिर्निर्गतजिह्वात्वं सप्तैते तदुपद्रवाः ॥ * ॥
तद्युक्ताया अरिष्टत्वमाह ।
ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहानाम् ।
सर्व्वास्त्वतिप्रसक्ता रोगकृशानां वमिप्रसक्तानाम् ॥
घोरोपद्रवयुक्तास्तृष्णा मरणाय विज्ञेयाः ।
आदिशब्दादतीसारादीनां ग्रहणम् । अति-प्रसक्ताः निरन्तराः । घोरोपद्रवयुक्ताः अतीव-मुखशोषादियुताः ॥ * ॥
अथ तृष्णायाश्चिकित्सा ।
वातघ्नमन्नपानं मृदु लघु शीतञ्च वाततृष्णायाम् ।
तृष्णायां पवनोत्थायां सगुड़ं दधि शस्यते ।
स्वादु तिक्तं द्रवं शीतं पित्ततृष्णापहं परम् ॥*॥
मुस्तपर्प्पटकोदीच्यछत्राख्योशीरचन्दनैः ।
शृतं शीतं जलं दद्यात् तृड्दाहज्वरशान्तये ॥
छत्रा धान्याकम् । कश्चिद्ब्राह्मीञ्च दद्यात् ।
चन्दनमत्र धवलं दद्यात्तस्यातितृष्णाहरत्वात् ।
शृतमर्द्धपक्वमत्र कर्त्तव्यम् । इति षड़ङ्गपानम् ॥१॥
लाजोदकं मधुयुतं शीतं गुड़विमर्द्दितम् ।
काश्मरीशर्करायुक्तं पिबेत् तृष्णार्द्दितो नरः ॥२॥